४२. य इमां ग्रहीष्यति पर्यापुणती स नित्यं

प्रज्ञाय पारमित यत्र चरन्ति नाथाः।

विष वह्नि शस्त्र उदकं न क्रमाति तस्यो

ओतारु मारु न च विन्दति मारपक्षो॥१॥

४३. परिनिर्वृतस्य सुगतस्य करेय्य स्तूपां

पूजेय सप्तरतनामयु कश्चिदेव।

तेहि प्रपूर्ण सिय क्षेत्रसहस्रकोट्यो

यथ गङ्गवालिकसमैः सुगतस्य स्तूपैः॥२॥

४४. यावन्त सत्त्व पुन तान्तक क्षेत्रकोट्यो

ते सर्वि पूजन करेयुरनन्तकल्पान्।

दिव्येहि पुष्पवरगन्धविलेपनेहि

कल्पांस्त्रियध्वपरिकल्प ततोऽपि भूयः॥३॥

४५. यश्चो इमां सुगतमात लिखित्व पुस्ते

यत उत्पती दशबलान विनायकानाम्।

धारेयि सत्करयि पुष्पविलेपनेहि

कल पुण्य भोन्ति न स स्तूपि करित्व पूजाम्॥४॥

४६. महविद्य प्रज्ञ अयु पारमिता जनानां

दुखधर्मशोकशमनी पृथुसत्त्वधातोः।

येऽतीत येऽपि च दशद्दिश लोकनाथा

इम विद्य शिक्षित अनुत्तरवैद्यराजाः॥५॥

४७. ये वा चरन्ति चरियां हितसानुकम्पा-

मिह विद्यशिक्षित विदु स्पृशिष्यन्ति बोधिम्।

ये सौख्य संस्कृत असंस्कृत ये च सौख्या

सर्वे च सौख्य प्रसुता इतु वेदितव्याः॥६॥

४८. बीजाः प्रकीर्ण पृथिवीस्थित संभवन्ति

सामग्रि लब्ध्व विरुहन्ति अनेकरुपाः।

यावन्ति बोधिगुण पारमिताश्च पञ्च

प्रज्ञाय पारमित ते विरुहन्ति सर्वे॥७॥

४९. येनैव राज व्रजते स ह चक्रवर्ती

तेनैव सप्त रतना बलकाय सर्वे।

येनैव प्रज्ञ इय पारमिता जिनानां

तेनैव सर्वगुणधर्म समागमन्ति॥८॥

भगवत्यां रत्नगुणसंचयगाथायामप्रमेयगुणधारणपारमितास्तूपसत्कारपरिवर्तो नाम तृतीयः॥